न्यास दशकं

न्यास दशकं

श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी |
वेदांताचार्यवर्यो मे सन्निधत्तां सदा हृदि ||

अहं मद्रक्षणभरो मद्रक्षणफलं तथा |
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेत् बुधः || 1 ||

न्यस्याम्यकिंचनः श्रीमन् अनुकूलोऽन्यवर्जितः |
विश्वासप्रार्थनापूर्वं आत्मरक्षाभरं त्वयि || 2 ||

स्वामी स्वशेषं स्ववशं स्वभरत्वेन निर्भरं |
स्वदत्तस्वधिया स्वार्थं स्वस्मिन् न्यस्यति मां स्वयं || 3 ||

श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः |
एतद्देहावसाने मां त्वत्पादं प्रापय स्वयं || 4 ||

त्वच्छेषत्वे स्थिरधियं त्वत् प्राप्त्येकप्रयोजनं |
निषिद्धकाम्यरहितं कुरु मां नित्यकिंकरं || 5 ||

देवीभूषणहेत्यादिजुष्टस्य भगवंस्तव |
नित्यं निरपराधेषु कैंकर्येषु नियुंक्ष्व मां || 6 ||

मां मदीयं च निखिलं चेतनाऽचेतनात्मकं |
स्वकैंकर्योपकरणं वरद स्वीकुरु स्वयं || 7 ||

त्वदेकरक्ष्यस्य मम त्वमेव करुणाकर |
न प्रवर्तय पापानि प्रवृत्तानि निवर्तय || 8 ||

अकृत्यानां च करणं कृत्यानां वर्जनं च मे |
क्षमस्व निखिलं देव प्रणतार्तिहर प्रभो || 9 ||

श्रीमान् नियतपंचांगं मद्रक्षणभरार्पणं |
अचीकरत् स्वयं स्वस्मिन् अतोऽहमिह निर्भरः || 10 ||

मंगळश्लोकः –

संसारावर्तवेगप्रशमनशुभदृग्देशिकप्रेक्षितोहं
संत्यक्तोन्यैरुपायैरनुचितचरितेश्वद्य शांताभिसंधिः |
निश्शंकस्तत्त्वदृष्ट्वा निरवधिकदयं प्रार्थ्य संरक्षकं त्वां
न्यस्य त्वत्पादपद्मे वरद निजभरं निर्भरो निर्भयोस्मि ||

इति श्रीमद्वेंकटनाथस्य वेदांताचार्यस्य कृतिषु न्यास दशकं ||